"तस्मिन् महन्मुखरिता मधुभिच्चरित्र-पीयूषशेषसरितः परितः स्रवन्ति ॥")

मधुमक्षिका, स्त्री, ( मधुसञ्चायिका मक्षिका ।) कीटविशेषः । मौमाछी इति भाषा । तत्पर्य्यायः । सरघा २ । इत्यमरः । २ । ५ । २६॥

मधुमज्जा, [न्] पुं, ( मधुर्मधुरो मज्जा यस्य । ) आखोटवृक्षः । इति राजनिर्घण्टः ॥

मधुमती, स्त्री, ( मधुर्मधुररसोऽस्यत्रेति मतुप् । ङीप् । ) काश्मरीवृक्षः । नदीविशेषः । तस्या जलगुणाः । यथा, राजनिर्घण्टे ।

"चन्द्रभागागुणसाम्यदं जलं
किञ्च माधुमतमग्निदीपनम् ॥"

उपास्यनायिकाविशेषः । यथा,—
"तथा मधुमती सिद्धिर्जायते नात्र संशयः ।
देवचेटी शतशतं तस्य वश्या भवन्ति ह ॥
स्वर्गे मर्त्ये च पाताले स यत्र गन्तुमिच्छति ।
तत्रैव चेटिकाः सर्व्वा नयन्ति नात्र संशयः ॥"
इति कुकलासदीपिकायां ३ पटलः ॥

( छन्दोभेदः । अस्या लक्षणं यथा, छन्दोमञ्जर्य्याम् । २ । १ ।
"ननगि मधुमती ।" अधिकं छन्दःशब्दे द्रष्टव्यम् ॥ समाधिसिद्धिभेदः । यथा, सर्व्वदर्शनसंग्रहे पातञ्जलदर्शने । "तत्र मधुमती नामाभ्यासवैराग्यादिवशादपास्तरजस्तमोलेशसुखप्रकाशमयसत्त्वभावनयानवद्यवैशारद्यविद्योतनरूपऋतम्भरप्रज्ञाख्या समाधिसिद्धिः ॥ गङ्गा । यथा, काशीखण्डे । २९ । १३३ ।
"महोदया मधुमती महापुण्या मुदाकरी ॥"
इक्ष्वाकुपुत्त्रहर्य्यश्वस्य भार्य्या सा च मधोर्दैत्यस्य सुता । यथा, हरिवंशे । ९३ । १२—१३ ।
"आसीद्राजा मनोर्वंशे श्रीमानिक्ष्वाकुसम्भवः ।
हर्य्यश्व इति विख्यातो महेन्द्रसमविक्रमः ॥
तस्यासीद्दयिता भार्य्या मधोर्दैत्यस्य वै सुता ।
देवी मधुमती नाम यथेन्द्रस्य शची तथा ॥"
मधुरसविशिष्टे, त्रि । यथा, ऋग्वेदे ।७।६९।३।
"स्वश्वायशसायातमर्व्वाग् दस्रानिधिं मधुमन्तं पिबाथः ॥")

मधुमथनः, पुं, ( मधुं तन्नामानं दैत्यं मथ्नातीति । मन्थ+ल्यु ।) विष्णुः । इति हलायुधः ॥ (यथा, भागवते । ६ । ९ । ३९ ।
"सर्व्वात्मनि निरतनिर्वृतमनसः कथमुह वा एते मधुमथन ! पुनः स्वार्थकुशला ह्यात्मप्रियसुहृदः साधवस्त्वच्चरणाम्बुजानुसेवां विसृजन्ति न यत्र पुनरयं संसारपर्य्यावर्त्तः ॥")

मधुमल्ली, स्त्री, ( मधुप्रधाना मल्ली । ) मालती । इति शब्दमाला ॥

मधुमस्तकं, क्ली, ( मधुर्मधुररसः मस्तके उपरिभागे यस्य । ) पिष्टकविशेषः । यथा,—
"मधुतैलघृतैर्मध्ये वेष्टिताः समिताश्च याः ।
मधुमस्तकमुद्दिष्टं तस्याख्यापरिमार्जनम् ॥"
इति शब्दचन्द्रिका ॥
अस्य गुणाः पिष्टशब्दे द्रष्टव्याः ॥

मधुमाध्वीकं, क्ली, (मधु माधुर्य्ययुक्तं माध्वीकम् ।) मद्यम् । इत्यमरटीकायां भरतः ॥

मधुमारकः, पुं, ( मधूनां मारकः । भक्षकत्वात्तथात्वमस्य । ) भ्रमरः । इति राजनिर्घण्टः ॥

मधुमूलं, क्ली, ( मधु मधुरं मूलम् । ) आलुकम् । इति शब्दचन्द्रिका । मौ आलु इति भाषा ॥

मधुयष्टिः, स्त्री, ( मधुर्मधुरा यष्टिः ।) इक्षुः । इति शब्दचन्द्रिका ॥

मधुयष्टिका, स्त्री, ( मधुर्मधुरा यष्टिः । ततः कन् टाप् । ) यष्टिमधु । तत्पर्य्यायः । मधुकम् २ क्लीतकम् ३ यष्टिमधुका ४ । इत्यमरः । २ । ४ । १०९ ॥ मधुयष्टी ५ । इति भरतः ॥ (तथास्याः पर्य्यायान्तरम् ।
"यष्ट्याह्वं मधुकं यष्टि क्लीतकं मधुयष्टिका ।
यष्टिमधु स्थले जाता जलजातिरसा पुरा ॥"
इति वैद्यकरत्नमालायाम् ॥)

मधुयष्टी, स्त्री, ( मधुयष्टि । कृदिकारादिति पक्षे ङीष् । ) मधुयष्टिका । इति शब्दमाला ॥

मधुरं, क्ली, ( मधु+रः । ) वङ्गम् । इति राजनिर्घण्टः ॥ विषम् । इति मेदिनी । रे, १९५ ॥ (वङ्गशब्दे विषशब्दे च विवरणमस्य ज्ञातव्यम् ॥)

मधुरः, पुं, ( मधु माधुर्य्यं रातीति । रा+कः । यद्वा, मधुमाधुर्य्यमस्यास्तीति । "ऊषसुषिमुष्कमधो रः ।"५।२।१०७ । इति रः ।) मिष्टरसः । इत्यमरः । १ । ५ । ९ ॥ स च इक्ष्वादौ लभ्यते । तत्पर्य्यायः । गौल्यः २ । इति राजनिर्घण्टः ॥ रसज्येष्ठः ३ गुल्यः ४ स्वादुः ५ मधूलकः ६ । इति हेमचन्द्रः । ६।२४ ॥ तस्य गुणाः । प्रीणनत्वम् । बल्यत्वम् । बृंहणत्वम् । वायुपित्तनाशित्वम् । रसायनत्वम् । गुरुत्वम् । स्निग्धत्वम् । चक्षुष्यत्वम् । तर्पणत्वम् । सरत्वञ्च । अन्यच्च ।
"रसो मधुरकः शीतो धातुस्तन्यबलप्रदः ।
चक्षुष्यो वातपित्तघ्नः कुर्य्यात् स्थौल्यकफक्रिमीन् ॥
सोऽतियुक्तो ज्वरश्वासगलगण्डादिरोगकृत् ॥"
इति राजवल्लभः ॥
अपि च ।
"मधुरस्तु रसश्चिनोति केशान्
वपुषः स्थैर्य्यबलौजोवीर्य्यदायी ।
अतिसेवनतः प्रमेहशैत्य-
जडतामान्द्यमुखान् करोति दोषान् ॥"
इति राजनिर्घण्टः ॥
( यथा च वाभटे सूत्रस्थाने दशमेऽध्याये ॥
"रसानामिति रूपाणि कर्म्माणि मधुरो रसः ।
आजन्मसात्म्यात् कुरुते धातूनां प्रबलं बलम् ।
बालवृद्धक्षतक्षीणवर्णकेशेन्द्रियौजसाम् ॥
प्रशस्तो बृंहणो कण्ठ्यः स्तन्यसन्धानकृद्गुरुः ।
आयुष्यो जीवनः स्निग्धः पित्तानिलविषापहः ॥
कुरुतेऽत्युपयोगेन समेदःकफजान् गदान् ।
स्थौल्याग्निसादसंन्यासमेहगण्डार्ब्बुदादिकान् ॥"
अपिच ।
"तत्र मधुरो रसः शरीरसात्म्याद्रसरुधिरमांसमेदोऽस्थिमज्जौजः शुक्राभिवर्द्धन आयुष्यः षड़िन्द्रियप्रसादनो बलवर्णकरः पित्तविषमारुतघ्नस्तृष्णाप्रशमनः त्वच्यः केश्यः कण्ठ्यः प्रीणनो जीवनस्तर्पणः स्नेहनः स्थैर्य्यकरः क्षीणक्षतसन्धानकरः घ्राणमुखकण्ठौष्ठतालुप्रह्लादनो दाहमूर्च्छाप्रशमनः षट्पदपिपीलिकानामिष्टतमः स्निग्धः शीतो गुरुश्च ।
स एवंगुणोऽप्येक एवात्यर्थमुपयुज्यमानः स्थौल्यं मार्द्दवमालस्यमतिस्वप्नं गौरवमनन्नाभिलाषमग्नेर्दौर्बल्यमास्यकण्ठमांसाभिवृद्धिं श्वासकासप्रतिश्यायालसकशीतज्वरानाहास्यमाधुर्य्यवमथुसंज्ञास्वरप्रणाशगलगण्डमालाश्लीपदगलशोफवस्तिधमनीगुदोपलेपाक्ष्यामयानभिष्यन्दमित्येवंप्रभृतीन् कफजान् विकारानुपजनयन्ति ।
"स्नेहनप्रीणनाह्लादमार्द्दवैरुपलभ्यते ।
मुखस्थो मधुरश्चास्यं व्याप्नुवँल्लिम्पतीव च ॥"
इति चरके सूत्रस्थाने २६ अध्याये ॥)
जीवकः । रक्तशिग्रुः । राजाम्रः । रक्तेक्षुः । गुड़ः । शालिः । इति च राजनिर्घण्टः ॥
(बीजपूरविशेषः । तत्पर्य्यायो यथा,—
"बीजपूरोऽपरः प्रोक्तो मधुरो मधुककेटी ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
स्कन्दस्य सैनिकभेदः । यथा महाभारते । ९ । ४५ । ६९ ।
"मधुरः सुप्रसादश्च किरीटी च महाबलः ॥")

मधुरः, त्रि, (मधु माधुर्य्यमस्यास्तीति । "ऊषसुषिमुष्कमधो रः ।" ५ । २ । १०७ । इति रः । ) मधुररसविशिष्टः । स्वादुः । ( यथा, हितोपदेशे । १ । ७९ ।
"न धर्म्मशास्त्रं पठतीति कारणं
न चापि वेदाध्ययनं दुरात्मनः ।
स्वभाव एवात्र तथातिरिच्यते
यथा प्रकृत्या मधुरं गवां पयः ॥")
प्रियः । इति मेदिनी । रे, १९५ ॥ पारिभाषिकमधुराणि यथा । विदग्धोक्तिः । प्रियाधरकुचादिः । शशी । स्त्रियः । बालोक्तिः । इति कविकल्पलता ॥

मधुरकः, पुं, ( मधुर+संज्ञायां कन् । ) जीवकवृक्षः । इत्यमरः । २ । ४ । १४२ ॥ ( यथा, सुश्रुते चिकित्सितस्थाने ४ अध्याये ।
"विपचेन्मधुरकप्रतीवापम् ॥" )

मधुरकण्टका, स्त्री, ( मधुराः कण्टका यस्याः । ) मत्स्यविशेषः । तत्पर्य्यायः । कज्जली२ कज्जला३ अनन्ता ४ माध्वी ५ । इति शब्दरत्नावली ॥

मधुरजम्बीरः, पुं, ( मधुरो जम्बीरः । नित्यकर्म्मधारयः । ) मधुजम्बीरः । तत्पर्य्यायः । मधुजम्भः २ मधुजम्भलः ३ रसद्रावी ४ शर्करकः ५ पित्तद्रावी ६ । अस्य गुणाः । मधुरत्वम् । शिशिरत्वम् । कफपित्तशोफश्रमनाशित्वञ्च । इति राजनिर्घण्टः ॥

मधुरत्वचः, पुं, ( मधुरा त्वचा यस्य । ) धववृक्षः । इति त्रिकाण्डशेषः ॥ (गुणादयोऽस्य धवशब्दे ज्ञातव्याः ॥)